कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M 221 ~~M-2~~

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M ~~2176~~ 221 विषय ज्योतिषशास्त्र

नांव आयुर्दीपिक प्रयोग

लेखक / लिपीकार काशिनाथ वामन लेले

पृष्ठ 04 काळ शके 1804 पूर्ण / ~~अपूर्ण~~

Checked 2012

~~M-2176~~ 221

॥ दंकूर ॥ अथआयुर्वर्धापनप्रयोगः प्रारंभः ॥ पत्रसंख्या ॥ ४ ॥

आयुर्वर्धापन ॥ श्रीगणेशाय नमः ॥ अथ आयुर्वर्धापनप्रयोगः ॥ जन्मनक्षत्रे प्राक्संवत्सरात्प्रतिमासं नक्षत्रहोमः ॥ तत ऊ
र्ध्वं संवत्सरे संवत्सरे बाल्ये पिचादि कुर्यात् ॥ ऊर्ध्वस्वमेव वा कुर्यात् ॥ सौरमानेन ॥ यजमानः ॥ कृतावश्यक
॥ १ ॥ र्म्मियः ॥ सर्वौषधियुतजलपूरितकलशं संपूज्य ॥ तदुदकेन स्नात्वा ॥ शुक्लांबरधरोलंकृतः सौतुमाबध्यमा
त्युरवृ उपविश्य देशकालौ संकीर्त्य ममाब्दपूर्तिजन्मदिवसे आयुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं आ
युर्वर्धापनाख्यं कर्म करिष्ये ॥ इति संकल्प्य ॥ गणपतिं संपूज्य पुण्याहं वाचयित्वा ॥ आयुर्वर्धापनांगत्वेन उद्व
र्त्तनादि कर्म करिष्ये ॥ इति संकल्प्य ॥ उद्वर्त्तनादिभिः संस्कारं विधाय तत्र बलवर्धननामानमौपासनाग्निं लौकिका
ग्निं वा प्रतिष्ठाप्य समिच्चयमादाय अद्य गृहीत्यादि प्राणायामान् कृत्वा ॥ आयुर्वर्धापनहोमकर्मणि या यक्ष्यमाणा ॥ १ ॥
देवतास्ताः सर्वाः परिगृहीष्यामीत्यादि सामान्यप्रयानांतमुक्त्वा प्रधानहोमे ॥ अमुकजन्मनक्षत्रं तद्देवतां वा अष्टो
त्तरशतं महाष्टाविंशतिसंख्यया वा चरुणा यक्ष्ये ॥ अंगहोमे ॥ वरुणं हिरित्यादि व्याहृत्यंतमुक्त्वा ॥ जन्मनक्ष ॥ शंकर ॥

त्रं तद्देवतां च चरुणा तत्तन्नाममंत्रेण हुत्वा होमशेषं समाप्य नाचविद्दन्तहोमः ॥ स्वजननक्षत्रं तन्मदेवतां चंद्रं वरुणं च
यथोपचारैः संपूज्य कृताभिषेको यथाशक्ति स्वजनबंधुसुहृत्सु नास्ववाहनादिपूजां च कृत्वा ब्राह्मणान्भोजयित्वा गंधव
स्त्रादिभिरलंकृतः पत्नीपुत्रवतीभिर्नीराजितो ब्राह्मणाशिषो गृहीत्वा बहुविधाशीर्भिर्नन्दितो भवेत् ॥ आपूर्विकपक्षेण
चरुहोमः कार्यः ॥ इत्यायुर्वर्धापनप्रयोगः ॥ अथ शिशोः दोलारोहणे ॥ पारिजाते बृहस्पतिः ॥ दोलारोहणस्तु कर्तव्यो
बालस्य द्वादशे दिने ॥ षोडशे दिवसे वापि द्वात्रिंशद्दिवसेपि वेति ॥ भविष्ये ॥ अभीष्टपुण्यदिवसे चंद्रताराबलान्विते ॥ मृ
दुध्रुवक्षिप्रभे शुभा तातात्कुलयोषितः ॥ योगशापि हरिं स्मृत्वा प्राक्शीर्षं विन्यसेच्छुभमिति ॥ रेवती चित्रानूराधामृदु
नि ॥ रोहिण्युत्तरात्रयं च ध्रुवाणि ॥ हस्ताश्विनीपुष्याभिजितः क्षिप्राणि ज्योतिर्निबंधे ॥ कूरत्रये वैष्णवे पौष्णभे चादि
तिद्वये चाश्विनक्षत्रेषु ॥ कुर्याच्छिशूनां नृपतेश्च सद्दां दोलने वैस्मरितो भवंति ॥ न चैव विशेषः ॥ आंदोलारोह
णे पुंसो द्वादशो दिवसः शुभः ॥ तयोर्दत्रस्तु कन्यायाः न नक्षत्रविचारणेति ॥ द्वादशदिवसः ॥ षोडशदिवसस्यापक

॥अं॰पर्यंकारोहण॥ क्षणं॥ जन्मदिवसाद्द्वादशे षोडशे वा दिवसे पुंसः॥ त्रयोदशे कन्यायाः अन्यस्मिन्वा ज्योतिःशास्त्रोक्तसमये मृदुध्रुवक्षिप्रनक्ष
त्रादियुते शुभकाले यथाकालं कुलदेवतापूजां विधायालंकृतं शिशुं हरिद्राद्यलंकृतायां मात्राद्याः सौभाग्यवत्यः कुलि
॥२॥ नास्त्रियो गवाद्यापिनं हरिं स्मृत्य गीतवाद्यादिघोषे क्रियमाणे प्राक्शिरसं शाययेयुः॥ इति पर्यंकारोहणं॥ अथ
दुग्धपानं॥ एकत्रिंशे दिने द्वितीये जन्मनक्षत्रे जन्मदिवसे वा यथाचारमन्यस्मिन्वा प्रशस्ते नक्षत्रयुते शुभे काले
कुलदेवतापूजां विधाय गोक्षीरं शंखेन माता अन्या वा सुभगा कुमारं प्राक्शिरसं दक्षिणशिरसं वा पाययेदिति॥
अथ कर्णवेधः॥ जन्मदिवसाद्द्वादशे षोडशे वा दिने षष्ठसप्तममासान्यतममासे दंतजननात्पूर्वमेव ज्योतिर्वि
दादिष्टे शुभे काले पूर्वाह्णे माध्याह्ने वा विष्णुशिवब्रह्मचंद्रसूर्यदिगीशानां सत्यसरस्वतिकुलदेवतां गोब्राह्म ॥२॥
णान्यथाविभवं संपूज्य मातुरुत्संगस्थस्य शुभासनस्थस्य वालंकृतस्य शिशोः प्राङ्मुखस्योदङ्मुखस्य वा कुश
लेन सुवर्णादिसूच्या कर्णौ वेधयेदनारत्ते सूर्यरश्मिपातस्थले गणादौ कुमारस्य पूर्वं दक्षिणतः कुमार्या वामतः॥ ॥शंकर॥

वेधस्तु कृतोन्तृतीयनक्षत्रे क्षालनं कार्यं॥ आभरणधारणक्षमता भवतीति तथा वर्धनीयौ॥ पुंसः सूर्यरश्मिँप्रवेशयो
ग्यरंध्रपर्यंतं वर्धयेत्॥ लंबकर्णता तु निषिद्धा॥ स्त्रीणां तु यथेष्टं वर्धयेत्॥ अथ सूर्यावलोकनं सहैव निष्क्रमणं॥
तृतीयमासि जन्मदिने जन्मनक्षत्रे इष्टदेवतापूजनपूर्वकं शिशुना सोत्सवं सूर्यदर्शनं कारयित्वा॥ चतुर्थे मासि
शुभे काले वा चंद्रं धेनुं च दर्शयेत्॥ अथवा निष्क्रमणेन सहैव कार्यं॥ चतुर्थे षष्ठे वा मासि शुक्लपक्षे शुभति
थ्यादौ पिता सहभार्यः सहशिशुः अभ्यंगस्नानं कृतनैत्यकश्च प्राङ्मुख उपविश्य देशकालौ संकीर्त्य
ममास्य शिशोरायुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सूर्यावलोकनं निष्क्रमणं च करिष्ये॥ तदंगं गणेश
पूजनं पुण्याहवाचनं च करिष्ये॥ इति संकल्प्य॥ ततः इंद्राग्नियमनिर्ऋतिवरुणवायुकुबेरईशानानां प्राच्या
द्यष्टदिक्पालानां चंद्रार्कवायव्यादिदेवानां च यथाक्रमं पूजयित्वा ब्राह्मणान्संभोज्य शिशुमलंकृत्य अग्निं च
धेनुनादर्शनं कारयित्वा मंत्रान्पठेत्॥ चंद्रार्काग्निदिगीशानां दिशां च वरुणस्य च॥ निक्षेपार्थमिदं दद्मि ते

नोरक्षंतु सर्वदा॥ अप्रमत्तं मम तेवा दिवारात्रिमथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ एवं शिशुरक्षणार्थं देवा
संप्रार्थ्य विष्णुशिवालयोः अन्यतरस्मिन्गृहं गत्वा तत्र देवं पुष्पोपहारादिभिः संपूज्य गोमयानुलिप्ते चतुरस्रे देशे धा
न्यादि निधाय शिशुमाशायित्वा मंत्रेण रक्षां कुर्यात्॥ ॐ जूं सः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव ब
धनान्मृत्योर्मुक्षीय मामृतात्॥ सः जूं ॐ इत्येवं मृतसंजीवनं मंत्रं पठेत्॥ विभूत्याक्षतैर्वा मूर्ध्नि ललाटे रक्षां कृ
त्वा अपूपादिभिर्भूतेशानं गणेशं च समभ्यर्च्य शिशुभक्ष्यादिना तोषयित्वा शिषो वाचयित्वा॥ इति निष्क्रमणं॥
अथोपवेशनं॥ पंचमे मासि शुक्लपक्षे पूर्वाह्णे ज्योतिर्विदुक्तमुहूर्ते गणेशपूजनं पुण्याहवाचनं च कृत्वा॥ पद्महं पृथि
वीगुरुदेवद्विजान्पूरयित्वा भूमिमुल्लिप्य तत्र मंडलं कृत्वा तां स्वतुर्यादिमांगलिकध्वनौ क्रियमाणे शिशुमुपवेशय ॥३॥
येदेभिर्मंत्रैः॥ रक्षैनं वसुधे देवि सर्वदा सर्वगः शिशुं॥ आयुःप्रमाणं निखिलं निक्षिप स्व हरिप्रिये॥ अचिरादा
युषस्त्वस्य ये केचित्परिपंथिनः॥ जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान्॥ धारिण्यसि सर्वभूतानां मातस्त्वमधि ॥शंकर॥

कात्यसि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां॥ ततो ब्राह्मणान्संपूज्य शिषो वाचयित्वा॥ कर्मसाद्गुण्याय विष्णुं
स्मरेत्॥ कुमार्या अप्येवमेव कुर्यात्॥ इति स्मार्तानि॥ श्रीहरिहरेश्वरार्पणमस्तु॥ शके १८०४ चित्रभानुनामसं
वत्सरे कार्तिककृष्णप्रतिपदायां इदं पुस्तकं लेले इत्युपनामकेन वामनभट्टस्य सूनुना काशीनाथेन लिखितं॥
श्रीकृष्णावेणी सुप्रसंना वरदा भवतु॥ श्री॥ श्रीहरिहरेश्वर प्रसंनोस्तु॥

[illegible] र्धने॥

॥ इत्यायुर्वर्धापनप्रयोगः समाप्तः॥

```
[OrderDescription]
,CREATED=16.09.19 11:10
,TRANSFERRED=2019/09/16 at 11:13:37
,PAGES=6
,TYPE=STD
,NAME=S0001802
,Book Name=M-221-AAYUVARDHPIN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,
```